ILLiad TN: 3893744

Date: 4/13/2012

Borrower: HLS

Lending String: HUL

Barcode: HN6DCG

Patron: Graduate: Kendra Leigh

Journal Title: The twenty principal kávyakáras of the Hindus, or, Extracts from the works of twenty of the most renowned literati of India.An offering to the sixth International congress of Orientalists, to be held at Leyden in September 1883.By Rajah Comm. Sourindro Mo

Volume: Issue:
Month/Year: 1883Pages: 1-58(?)

Article Author:

Article Title: NA

Table of Contents: Table of Contents

Title/Verso Pages: Title/Verso Page(s)

Bibliography: Bibliography

Accompanying Images/Plates: Accompanying Images/Plates

Imprint: Via Scan and Deliver Service

ILL Number: 3893380

Call #: WID HD KH 1787

Deliver By: Mail


Shipping Address:
Harvard College Library
Interlibrary Loan
Widener Library Room G-30
Main College Yard
Cambridge, MA 02138-1994

Fax: 617-495-2129
Ariel: 140.247.124.160
Odyssey: 206.107.43.109

Harvard Depository

ILLiad TN: 3893744

THE TWENTY PIRINCIPAL KÁVYA KÁRAS OF THE HINDUS, PRESENTING THEIR RESPECTIVE WORKS TO THE SIXTH INTERNATIONAL CONGRESS OF ORIENTALISTS AT LEYDEN.



Chiranjíva. Jayadeva. Dandí. Bhatta. Śúdraka. Kavirája. Śríharsha. Mágha. Bháravi. Kálidása. Válmíki.
Śríharsha deva. Vishnuśarma. Viśákha. Bhartrihari. Bánabhatta. Subandhu. Bhavabhúti. Mayúrbhatta.
Bhattanárayana.

Lith: and Print: by Kristohury Das.

DESIGNED & LITHOGRAPHED FOR RAJAH DR S.M.TAGORE.

THE TWENTY PRINCIPAL

KÁVYAKÁRAS OF THE HINDUS,

OR

EXTRACTS FROM THE WORKS OF TWENTY OF THE MOST RENOWNED LITERATI OF INDIA.

AN OFFERING TO THE

Sixth International Congress of Orientalists,

To be held at Leyden in September 1883.

BY

RAJAH COMM. SOURINDRO MOHUN TAGORE, Mus. Doc.,

F. R. S. L., M. R. A. S.,

Companion of the Order of the Indian Empire;

KNIGHT COMMANDER OF THE ORDER OF LEOPOLD, BELGIUM; OF THE FIRST CLASS OF THE ORDER OF ALBERT, SAXONY;
OF THE MOST EXALTED ORDER OF FRANCIS JOSEPH, AUSTRIA;
OF THE ROYAL ORDER OF THE CROWN OF ITALY; OF THE MOST DISTINGUISHED ORDER OF DANNEBROG, DENMARK;
OF THE ROYAL ORDER OF KAPIOLANI, HAWAIIAN ISLANDS;
OF THE ROYAL ORDER OF MELUSINE OF PRINCESS MARY OF LUSIGNAN;
CHEVALIER OF THE FIRST CLASS OF THE IMPERIAL ORDER OF THE "PAOU SING" OR PRECIOUS STAR, CHINA;
OF THE SECOND CLASS OF THE IMPERIAL ORDER OF MEDJIDIE, TURKEY;

OF THE ORDER OF THE OAK CROWN OF THE NETHERLANDS; OF THE ROYAL PORTUGUESE MILITARY ORDER OF CHRIST;
KNIGHT OF THE SECOND CLASS OF THE HIGH IMPERIAL ORDER OF THE LION AND SUN, PERSIA;
KNIGHT OF THE ORDER OF BASABA-MÁLÁ, SIAM; KNIGHT OF THE GURKHÁ STAR OF SARASVATI, NEPAUL;
KNIGHT GRAND CROSS, SENATOR OF THE SUPREME COUNCIL, AND CONSUL GENERAL AT CALCUTTA,
OF THE VENERABLE EQUESTRIAN ORDER OF REDEEMER OF JERUSALEM;
COMMANDEUR DE ORDRE RELIGIEUX ET MILITAIRE DE SAINT-SAUVEUR DE MONT-REAL, DE SAINT-JEAN DE JERUSALEM, DU TEMPLE, DU SAINT-SEPULCRE, DE RHODES ET MALTE REFORME;

FRANC CHEVALIER OF THE ORDER OF THE KNIGHTS OF THE HOLY SAVIOUR OF MONT-REAL, JERUSALEM, RHODES AND MALTA;
CHEVALIER SAUVETEUR OF THE FIRST CLASS OF L'AREOPAGE DES CHEVALIER SAUVETEURS DE FRANCE;
KNIGHT OF HONOR OF THE ORDER OF CABALLEROS HOSPITALAROS, SPAIN;
FREE COMMANDER OF THE ORDER OF THE WHITE CROSS OF THE HUMANITARIAN ACADEMY, ITALY;
CAVALIERE OF HONOR OF THE ACADEMIC ORDER OF BUENOS AYRES, ARGENTINE REPUBLIC;
CHEVALIER OF THE CONGRESS FLUMINENSE OF RIO JANEIRO, BRAZIL;

CHEVALIER GRAND CROIX ET DIGNITAIRE DELEGUE A CALCUTTA, L'UNION VALDOTAINE, GENEVA;
MAGNUS EQUITIS ORDO ACCADEMICUS HUMANITARIUS UNIONIS VALLIS AUGUSTANÆ INSTITUTO BENEFICENTIÆ APUD REMPUBLICUM GENEVENSEM, GENEVA;
GRAND COMMANDEUR DELEGUE GENERAL A CALCUTTA INSTITUTE DES COMMANDEURS DU MIDI, TOULOUSE;
FOUNDER AND PRESIDENT, BENGAL MUSIC SCHOOL, AND BENGAL ACADEMY OF MUSIC; FELLOW OF THE UNIVERSITY OF CALCUTTA; SANGITA-NÁYAKA AND SANGITA-SILPA-VIDYÁSÁGARA;
NAWAB SHAHZADA OF THE PERSIAN EMPIRE;
&c., &c., &c., &c.

Calcutta:

PRINTED BY I. C. BOSE & CO., STANHOPE PRESS, 249, BOW-BAZAR STREET, AND PUBLISHED BY THE AUTHOR.

1883.

[*All rights reserved.*]

भारतीयविंशतिमुखप्रकाव्यकारोपहारः ।

अर्थात्

पाश्चात्त्यविदुषां इण्टार्-न्याशन्याल-कन्ग्रेस-सभायै

लीडेननगरे तस्याः षष्ठवार्षिकाधिवेशने सवङ्गमानं प्रदत्तो वाल्मीक्यादीनां

विंशतिभारतीयकाव्यशास्त्रकाराणां

ग्रन्थसारः ।

राजश्रीशौरीन्द्रमोहन ठाकुरेण

मिउजिक-डाक्तार; एफ्. आर्. एस्. एल्.; एम्. आर्. ए. एस्.;

कम्प्रानियन अव दि अर्डार अव दि इण्डियान एम्पायार;

फाउण्डार एण्ड प्रेसिडेण्ट वेङ्गाल मिउजिक स्कुल, एण्ड वेङ्गाल एकाडेमि अव मिउजिक; सङ्गीतनायक

एण्ड सङ्गीतशिल्पविद्यासागर; नवाव साहजादा अव दि पार्सियान एम्पायार प्रभृतिभिरुपाधिभि-

रन्वितेन, इयुरोपीयासियाटिकविविधानां अर्डाराणां कमाण्डारेण च

प्रणीतः प्रकाशितश्च ।

कलिकातराजधान्याम् ।

श्रीदैश्वरचन्द्र वसु एण्ड कोम्पानिना मुद्रितः ।

शकाब्दाः १८०५ ।

PREFACE.

THE favorable reception which was accorded to my allegorical work entitled "THE FIVE PRINCIPAL MUSICIANS OF THE HINDUS," written expressly as an offering to the Fifth International Congress of Orientalists, held at Berlin in September 1881, has emboldened me to undertake again a work of a similar nature which is intended as a present to the Sixth International Congress of Orientalists to be held at Leyden in September 1883, to which I have had the honor of being invited to take a part.

In this publication, I have made brief mention of twenty of the most renowned literati of India, and noticed the works which have made them famous. It is my intention to present these works, along with this treatise, to the Congress on the present occasion.

The Literature of India stands divided into the following seven classes:—

(1) *Mahá-kávya.*—This kind of work is composed in verse of varied metre, and consists of not less than eight cantos. It treats of the gods, khatriyas of high extraction, and kings born of one particular race. It is pervaded generally by sentiments of love, heroism and quiescence.

(2) *Kosha-kávya.*—Embodies *S'lokas* on different subjects.

(3) *Khanda-kávya.*—Partakes much of the character of the *Mahá-kávya.* Sometimes it is not divided into cantos, and when it is so divided, the cantos seldom exceed eight in number.

(4) *Gadya-kávya.*—Is *Kávya* written in prose.

(5) *Champu-kávya.*—Is *Kávya* written partly in verse and partly in prose.

(6) *Upákhyána-kávya.*—Consists of tales based on accounts of men, beasts or birds, natural or supernatural events, and is intended to convey moral instructions to juvenile readers.

(7) *Dris'ya-kávya.*—The "visible" *Kávya.* It means such "*Kávyas*" as are not only read, but are performed on the stage by Actors. Dramas and other cognate works come under this classification.

The twenty works intended as a present to the Congress are classed as follows :—

(a) *Mahá-kávya.*—RÁMÁYANA, RAGHUVANSA, KIRÁTÁRJJUNÍYA, S'ÍS'UPÁLA-BADHA, NAISHADA-CHARITA, RÁGHAVA-PÁNDAVÍYA, BHATTÍ and GÍTA-GOVINDA.

(b) *Kosha-kávya.*—VAIRÁGYA-S'ATAKA.

(c) *Khanda-kávya.*—SÚRYYA-S'ATAKA.

(d) *Gadya-kávya.*—DAS'AKUMÁRA-CHARITA, KÁDAMVARÍ and VÁSAVADATTÁ.

(e) *Champu-kávya.*—VIDVANMODA-TARANGÍNÍ.

(f) *Upákhyána-kávya.*—HITOPADES'A.

(g) *Dris'ya-kávya.*—MRICHCHHAKATIKÁ, UTTÁRA-CHARITA, MUDRÁRÁKSHASA, RATNÁVALÍ and VENÍ-SANHÁRA.

CALCUTTA,
PATHURIAGHATA RAJBATI,
The 1st June 1883.

S. M. TAGORE.

INTRODUCTORY.

THE scene was solemn and interesting. On her gorgeous Lion-Throne sat the Guardian Divinity of India. In her hand a letter, and though a soft smile was on her lips, her brow was thoughtful. The letter was an affectionate invitation to her, which had been sent from the land of the setting sun, to take a part in the deliberations of the Sixth International Congress of Orientalists, to be held at Leyden in September next. She was thinking how to respond suitably to the courteous invitation and whom to send as her worthy representatives. Soon the cloud on her brow vanished away, and the smile deepened on her ruby lips and lighted up her heavenly face. "My sons who have distinguished themselves in the literature of my beloved country will no doubt be able to represent me worthily at the great Congress." Saying this to herself, she called to mind those great and noble souls, those mighty workers in the field of Indian literature and strongly willed that they should appear before her.

Thus summoned, the mighty ones appeared before her with the speed of thought. They came from the celestial regions,—their present abode—with the spirit-light around them and the fragrance of heaven emanating from their celestial bodies. With heads bent low and with folded hands they waited for the commands of her whom they adored with all the fervency of their noble hearts. There they stood!—Válmíki, Kálidása, Bháraví, Mágha, Sríharsha, Kavirája, Súdraka, Bhatta, Dandi, Jayadeva, Chiranjíva, Mayúrabhatta, Bhavabhúti, Subandhu, Bánabhatta and his son, Bhartrihari, Visákadeva, Vishnusarmá, Sríharshadéva and Bhattanáráyana,—an imposing band—decked with ornaments not wrought by mortal hands and crowned with wreaths of amaranth.

The heart of the Divine Mother swelled with pride at the sight of her beloved children. She graciously beckoned them to approach nearer and thus addressed them:—

"Blessed be the womb which gave you birth, beloved children—who "are the light of my eyes. Through you I have attained the highest pinnacle "of glory in the three regions, and my name has been made famous through- "out the world. The master-minds of the West are again going to assem- "ble in conclave in the time-honored city of Leyden, and this invitation "has been sent to me to be present at the gathering. It is not possible "that I can for a moment leave the watch and ward of this my beautiful "country in other hands. It was for this that on the last occasion I had to "send your brothers,—the adepts in Music,—to represent me at the Congress. "It is now your turn. Speed then to the land where the sun sets and present "yourselves in my name before the great assembly at Leyden. There are "those who will welcome you with joy and will readily recognize those trans- "cendent talents which have rendered your names immortal."

She blessed them, with the light of joy sparkling in her magnificent lotus-eyes and with arms outstretched,—the jewelled bangles and bells tinkling melodiously as she moved them. It was a proud moment for those mighty spirits. Reverentially they bowed their acquiescence and, with throbbing hearts, conscious of the importance of the mission entrusted to them, took an affectionate leave and retired from the resplendent presence. Not a moment did they lose in speeding to their destination, which they reached instantaneously.

The scene was changed! They had left behind them the pearl-fringed shores of Hindustan, the feathery palms, the luxuriant foliage, the air redolent with odours, the sky without a cloud, the palaces and temples of their native land. Their foot now pressed an alien soil.

It was a lofty hall where the Congress had assembled. There were present representatives of almost every nation on the face of the earth, and before them stood the band of Indian literati, erect yet humble, each with a copy of his work for presentation to the savants, who had met there on the common ground of Literature and Science.

One by one they advanced, each in his turn, and in clear and melodious tones addressed the assembly, which was hushed to hear them speak. Each read out a portion of the work he had brought with him, which he then offered as a friendly tribute, and slowly retired.

1. VÁLMÍKI.—The *Mahá-kávya*, the "Rámáyaṇa," which describes the life and the warlike and other deeds of the celebrated Ráma Chandra.
2. KÁLIDÁSA.—The *Mahá-kávya*, the "Raghuvansa," based on the lives and characters of the solar kings from Dilípa to Agnivarṇa.
3. BHÁRAVÍ.—The *Mahá-kávya*, "Kirátárjjuníya," which described ARJJUNA'S fight with Mahádeva, who had assumed the shape and disguise of a fowler *(Kirāta)*.
4. MÁGHA.—The *Mahá-kávya*, "S'ís'upála-badha," describing how S'ís'upála was defeated and destroyed by Krishṇa.
5. S'RÍHARSHA.—The *Mahá-kávya*, "Naishadha-charita," describing the life and adventures of the virtuous monarch, Nala.
6. KAVIRÁJA.—The *Mahá-kávya*, "Rághava Pándavíya," each verse of which relates to Ráma Chandra and the Pándavas at the same time.
7. S'ÚDRAKA.—The *Driśya-kávya*, (drama), "Mrichchhakatika," in which the loves of Chárudatta and Vasanta-sená are described, and which is full of a variety of sentiments (*rasas*).
8. BHATTA.—The *Mahá-kávya*, "Bhatti," based on the Rámáyaṇa. It is intended for the use of literary students.
9. DANDI.—The *Gadya-kávya*, "Das'akumára-charita." A prose work which narrates the adventures of ten princes.
10. JAYADEVA.—The *Mahá-kávya*, "Gíta-govinda." It treats of the spiritual loves of Krishṇa and Rádhá. The songs in this work have been set to a large variety of *Rágas* and *Rágiṇís* (melody-types) and *Tálas* (measures).
11. CHIRANJÍVA.—The *Champu-kávya*, "Vidvanmoda-tarangíní," embodying the doctrines of all the religious sects and the doctrines of the different schools of philosophy in India.
12. MAYÚRABHATTA.—The *Khanda-kávya*, "Súryya-s'ataka." It contains a description of the Sun, of the effulgence, the chariot, the horses, the charioteer of that luminary,—the generator of the world. It also contains a magnificent hymn to the Solar God.

13. BHAVABHÚTI.—The *Dris'ya-kávya,* (drama) "Uttara-charita," based on the pathetic incidents of Sitá's exile.

14. SUBANDHU.—The *Gadya-kávya,* "Vásavadattá," describes how Prince Kandarpaketu, the son of Chintámani, King of Pushpapura, won the love and the hand of Vásavadattá, the object of his devoted love.

15. BÁNABHATTA and his Son.—The *Gadya-kávya,* "Kádamvarí," describes how Tárápíra, the son of King Chandrapíra, obtained for his bride, the lovely Kádamvarí, who was the daughter of a *Gandharva* (celestial musician.)

16. BHARTRIHARI.—The *Kosha-kávya,* "Vairágya-S'ataka." The sentiment of repose and quiescence is to be found throughout this work. It teaches mankind of the transitoriness of mundane things and the necessity of *Vairágya.*

17. BIS'ÁKHADEVA.—The *Dris'ya-kávya* (drama), "Mudrá-rákshasa," describes how the Nanda dynasty was annihilated, how Chandra Gupta ascended the throne of Magadha, and the intricate diplomacy of Chánakya.

18. VISHNUS'ARMMÁ.—The *Upákhyána-kávya,* "Hitopades'a."—A book of anecdotes, and tales for inculcating moral maxims into juvenile hearts.

19. S'RÍHARSHADEVA.—The *Drisya-kávya,* "Ratnávalí," describing the love and marriage of the child-princess, Ratnávalí with King Vatsa.

20. BHATTANÁRÁYANA.—The *Drisya-kávya,* "Veni-sanhára," an episode of the sanguinary war between the Kurus and the Pándavas.

The reception accorded to the mighty spirits from India filled their hearts, with satisfaction. They saw their offerings joyfully received by the Assembly and heard murmured praises of their literary labors. Calmly, and smilingly, they surveyed the throng, and then all at once burst forth from them the following farewell chorus :—

1.

Blessed are our eyes, for we have seen the good and the wise, the learned and the mighty, who compose this vast assembly. Our hearts have communed

with their hearts, and we have come to know how pleasant-spoken, how respectable, how noble are those who have given us such cordial welcome. Mighty are they, yet humble, set up in high places, yet devoid of pride, magnanimous and discriminating and full of erudition as was the sage Vrihaspati. Accept our heart-felt thanks, O! ye savants of the West, for the honor done to us.

2.

We had grown sick of the world, and our hearts revolted at the sight of men whose deeds daily made us ashamed. We said to ourselves,—they have wholly gone astray, the good and the true have become rare upon earth; but we have seen you,—and our hearts are jubilant,—the despair within us for the lack of goodness on earth has been turned into rejoicing. For this gladness of heart, after nights of sorrow, we thank you again and again.

3.

O Holland! land of industry and wealth! How neat and trim, how clean and well-ordered are your gardens and roads, your schools and hospitals, your canals and fortifications! Foreign countries pour their riches into your lap. Your goodly vessels plough distant seas, and your loyal sons are proud of your wealth and magnificence. Less glorious is Alakápurí, the renowned City of Kuvera,—the god of riches, than the cities which you possess.

4.

Proud may you well be, O Holland! that in one of your ancient cities the wise and the learned of different realms, whom the gods have inspired with wisdom and learning, have met to do you honor and to advance the cause of Arts and Sciences. The Congress of these great men is like unto the assembly of the gods under the presidency of Indra.

5.

May He at whose bidding Brahmá, the Creator, created the world, at whose behest Vishnu, the Preserver, keeps, like an indulgent father, his children from harm, at whose command Mahádeva, the Destroyer, sends forth destruction;—may that First Great Being bless the Assembly and protect them from all evil! Our mission is ended. Farewell! Farewell!.



काव्योपहारः।

श्रीजयोऽभ्युदयोऽस्तु।

हलखण्डान्तर्गते रम्ये लौडेनाख्ये पुरोत्तमे।
कवीनां समवेतानां विनोदाय यशस्विनाम्॥
जनन्या भारतावन्या वर्द्धमानपुरःसरम्।
दीयतेऽयं काव्यपुष्पहारोपहार उज्ज्वलः॥

विदुषां महतीं गोष्ठीं सम्मानयितुमाह्वयत्।
हलखण्डो भारतधरां लौडेने नगरोत्तमे॥

आह्वता भारतोर्वी तान् सस्मार तनयान् कवीन्।
येषां काव्यप्रसूनोत्थैर्गन्धैरामोदिता धरा॥

वाल्मीकिः कालिदासश्च भारविर्माघ एव च।
श्रीहर्षः कविराजश्च शूद्रको भट्टदण्डिनौ॥

जयदेवश्चिरञ्जीवो मयूरभट्ट एव च।
भवभूतिः सुबन्धुश्च बाणभट्टश्च तत्सुतः॥

भर्त्तृहरिर्विशाखश्च विष्णुशर्म्मा तथापरः।
राजश्रीहर्षदेवश्च भट्टनारायणो द्विजः॥

एते सुता दिव्यदेहाः प्रभामण्डलमण्डिताः।
दिव्यगन्धानुलिप्ताङ्गा दिव्याभरणभूषिताः॥

मातुः स्मरणमात्रेण परित्यज्य सुरालयम्।
कृताञ्जलिपुटा भूत्वा आगता धरणीतलम्॥

स्मरणोपस्थितान् सर्वान् विनयावनतान् सुतान्।
अङ्के निधाय प्रोवाच भारतोर्वी त्विदं वचः॥

वत्सा युष्मान् प्रसूयाहं भुवने गौरवान्विता।
अतः सर्वैः स्वसृपुत्रैरधुनापि समादृता॥

लीडेने कविवृन्दानां भविता महती सभा।
तत्राहूतापि वार्द्धक्यात् सादरं गन्तुमक्षमा॥

अतएव सुतास्तव यूयं गच्छत सत्वरम्।
प्रदर्श्य निजशक्तिं मे मुखमुज्ज्वलयाधुना॥

इति मातृवचः श्रुत्वा वाल्मीक्यादिनरोत्तमाः।
प्रणम्य जननीं देवीं पतिता दण्डवद्भुवि॥

अथादायोपहारार्थं स्वस्वग्रन्थान् रसाश्रयान्।
जग्मुस्तत्र प्रहृष्टास्ते निर्जित्य मानसीं गतिम्॥

वङ्गजनपदसंस्थानेकशास्त्रार्थविद्भिः
गुरुसमबुधसङ्घैः शोभमानां सभां ताम्।
प्रथितसुकवयस्ते भारतीयाः प्रविश्य
सविनयमिदमूचुः श्लक्ष्णवाक्यं प्रहृष्टाः॥

वाल्मीकिरुवाच।

प्रसिद्धं रामचरित्यमवलम्ब्य मया कृतम्।
रामायणं महाकाव्यं * रसैरष्टाभिराचितम्॥
सभे सभाजनायाद्य तवोपक्रियते हि तत्।
कियदंशं मुदा तस्य पठतो मे निशामय॥

रामायणम्।

तदप्रियमभिघ्नो वचनं मरणोपमम्।
श्रुत्वा न विव्यथे रामः कैकेयीञ्चेदमब्रवीत्॥
एवमस्तु गमिष्यामि वनं वस्तुमहं ब्रितः।
जटाचीरधरो राज्ञः प्रतिज्ञामनुपालयन्॥

* सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते॥
अङ्गानि सर्व्वेऽपि रसाः सर्व्वे नाटकसन्धयः।
इतिहासोद्भवं वृत्तं अन्यदा सज्जनाश्रयम्॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्।
आदौ नमस्क्रियाशीर्व्वा वस्तुनिर्देश एव वा॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम्।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः॥
नातिह्रस्वा नातिदीर्घाः सर्गा अष्टाधिका इह।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।
सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः॥
प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।
नामास्य सर्गोपादेयकथया सर्गनाम तु॥

इदन्तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः।
नाभिनन्दति दुर्धर्षो यथापूर्व्वमरिन्दमः॥
मन्युर्न च त्वया कार्य्यो देवि ब्रूमि तवाग्रतः।
यास्यामि भव सुप्रीता वनं चीरजटाधरः॥
हितेन गुरुणा पित्रा कृतज्ञेन नृपेण च।
नियुज्यमानो विश्रब्धः किं न कुर्य्यामहं प्रियम्॥
व्यलीकं मानसन्त्वेकं हृदयं दहतीव मे।
स्वयं यन्नाह मां राजा भरतस्याभिषेचनम्॥
अहं हि सीतां राज्यञ्च प्राणानिष्टान् धनानि च।
हृष्टो भ्रात्रे स्वयं दद्यां भरताय प्रणोदितः॥
किं पुनर्मनुजेन्द्रेण स्वयं पित्रा प्रणोदितः।
तव च प्रियकामार्थं प्रतिज्ञामनुपालयन्॥
तदाश्वासय श्रीमन्तं किमिदं यन्महीपतिः।
वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति॥
गच्छन्तु चैवानयितुं दूताः शीघ्रजवैर्हयैः।
भरतं मातुलकुलाद्यैव नृपशासनात्॥
दण्डकारण्यमेषोऽहमितो गच्छामि सत्वरः।
अविचार्य्य पितुर्वाक्यं सभा वस्तुं चतुर्दश॥
सा हृष्टा तस्य तद्वाक्यं श्रुत्वा रामस्य कैकयी।
प्रस्थानं श्रद्दधाना हि त्वरयामास राघवम्॥

सामान्योपहृतिं गोष्ठि मया दत्तां प्रयत्नतः।
गृहीत्वा श्रमसाफल्यं कर्त्तुमर्हसि मेऽधुना॥

कालिदास उवाच ।

मया कृतं महाकाव्यं रघुवंशं प्रयत्नतः ।
दिलीपाद्यग्निवर्णान्तनृपतीनां महात्मनाम् ॥
चरितं वर्णितं तत्र तदद्योपहराम्यहम् ।
सभे तस्य कियानंशः श्रूयतां गदतो मम ॥

रघुवंशम् ।

अथार्द्धरात्रे स्तिमितप्रदीपे
शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेशा-
मदृष्टपूर्वां वनितामपश्यत् ॥
सा साधुसाधारणपार्थिवर्द्धेः
स्थित्वा पुरस्तात् पुरुहूतभासः ।
जेतुः परेषां जयशब्दपूर्वं
तस्याञ्जलिं बन्धुमतो बबन्ध ॥
अथानपोढ़ार्गलमप्यगारं
छायामिवादर्शतलं प्रविष्टाम् ।
सविस्मयो दाशरथेस्तनूजः
प्रोवाच पूर्वार्द्धविदृष्टतल्पः ॥
लब्धान्तरा सावरणेऽपि गेहे
योगप्रभावो न च दृश्यते ते ।
बिभर्षि चाकारमनिर्वृतानां
मृणालिनी हैममिवोपरागम् ॥

का त्वं शुभे कस्य परिग्रहो वा
किं वा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां
मनः परस्त्रीविमुखप्रवृत्ति॥

तमब्रवीत्सा गुरुणानवद्या
या नीतपौरा स्वपदोन्मुखेन।
तस्याः पुरः सम्प्रति वीतनाथां
जानीहि राजन्नधिदेवतां माम्॥

वस्तौकसारामभिभूय साहं
सौराज्यबद्धोत्सवया विभूत्या।
समग्रशक्तौ त्वयि सूर्यवंश्ये
सति प्रपन्ना करुणामवस्थाम्॥

विशीर्णतल्पाट्टशतो निवेशः
पर्यस्तशालः प्रभुणा विना मे।
विडम्बयत्यस्तनिमग्नसूर्यं
दिनान्तमुग्रानिलभिन्नमेघम्॥

निशासु मास्वत्कलनूपुराणां
यः सम्भरोऽभूदभिसारिकाणाम्।
नदन्मुखोल्काविचितामिषाभिः
स वाह्यते राजपथः शिवाभिः॥

आस्फालितं यत्प्रमदाकराग्रै-
र्मृदङ्गधीरध्वनिमन्वगच्छत्।
वन्यैरिदानीं महिषैस्तदम्भः
शृङ्गाहतं क्रोशति दीर्घिकाणाम्॥

दत्तेक्षया यष्टिनिवासभङ्गात्
मृदङ्गशब्दापगमादलास्याः।
प्राप्ता दवोल्काहतशेषबर्हाः
क्रीडामयूरा वनबर्हिणत्वम्॥
सोपानमार्गेषु च येषु रामा
निक्षिप्तवत्यश्चरणान् सरागान्।
सद्योहृतन्यङ्कुभिरस्रदिग्धं
व्याघ्रैः पदं तेषु निधीयते मे॥

मया दत्तं तवानर्घं उपहारमिमं सभे।
स्वीकुरु मम सन्तोषोत्पादनाय बुधाश्रये॥

भारविरुवाच।

किरातार्जुनसम्वादं समाश्रित्यातियत्नतः।
एतत् किरातार्जुनीयं महाकाव्यं मया कृतम्॥
उपहारमिमं ग्रन्थं सभे तुभ्यं ददाम्यहम्।
श्लोकान् कतिपयान् तस्य पाठ्यमानान्निशामय॥

किरातार्जुनीयम्।

स किं सखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः॥
निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनाञ्चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम्॥

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुञ्जगतीं सुयोधनः॥
तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
रसुन्नयन् भूतिमनार्यसङ्गमाद्-
वरं विरोधोऽपि समं महात्मभिः॥
कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपामृषिवीप्सितां गुणा।
विभज्य नक्तन्दिवमस्रतन्द्रिणा
वितन्यते तेन नयेन पौरुषम्॥
सखीनिव प्रीतियुजोऽनुजीविनः
सगानमानान् सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम्॥
असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम्॥
निरत्ययं साम न दानवर्जितं
न भूरिदानं विरहय्य सक्रियाम्।
प्रवर्त्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सक्रिया॥

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म्म इत्येव निरुक्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्म्मविप्लवम्॥
विधाय रक्षान् परितः परेतरा-
नशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः॥
अनारतन्तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायती-
रुपेत्य सङ्घर्षमिवार्थसम्पदः॥
अनेकराजन्यरथाश्वसङ्कुलं
तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिराद्रुतां
भृशं नृपोपायनदन्तिनां मदः॥

अकिञ्चित्करमेतं मे उपहारं तवाग्रतः।
स्थापितं पण्डिताराध्ये गृहाण त्वं सभेऽधुना॥

माघ उवाच ।

शिशुपालं यथा कृष्णोऽवधीत्तद्वृत्तसंश्रितम् ।
शिशुपालवधाख्यं हि महाकाव्यं मया कृतम् ॥
सभे सम्भावनायैतमुपहारं ददामि ते ।
दृष्ट्वेतस्य कतिश्लोकान् संक्षेपेण मयोदितान् ॥

शिशुपालवधम् ।

इति ब्रुवन्तं तमुवाच स व्रती
न वाच्यमित्थं पुरुषोत्तम त्वया ।
त्वमेव साक्षात्करणीय इत्यतः
किमस्ति कार्यं गुरु योगिनामपि ।
उदीर्णरागप्रतिरोधकं जनै-
रभीक्ष्णमक्षुण्णतयातिदुर्गमम् ।
उपेयुषी मोक्षपथं मनस्विन-
स्त्वमग्रभूमिर्निरपायसंश्रया ॥
उदासितारं निगृहीतमानसै-
र्गृहीतमध्यात्मदृशा कथञ्चन ।
वहिर्विकारं प्रकृतेः पृथग्रिपुः
पुरातनं त्वां पुरुषं पुराविदः ॥
निवेशयामासिथ हेलयोद्धृतं
फणाभृताञ्छादनमेकमोकसः ।
जगत्त्रयैकस्थपतिस्त्वमुच्चकै-
रहीश्वरस्तम्भशिरःसु भूतलम् ॥
अनन्यगुर्वात्मव केन केवलः
पुराणकर्त्तेर्महिमावगम्यते ।
मनुष्यजन्मापि सुरासुरान् गुणै-
र्भवान् भवच्छेदकरैः करोत्यधः ॥

लघूकरिष्यन्नतिभारभङ्गुरा-
मस्मद्विधं त्वं त्रिदिवादवातरः।
उदूढलोकत्रितयेन साम्प्रतं
गुरुर्धरित्री क्रियतेतरां त्वया॥
निजौजसोज्जासयितुं जगद्द्रुहा-
मुपाजिहीथा न महीतलं यदि।
समाहितैरप्यनिरूपितस्ततः
पदं दृशः स्याः कथमीश मादृशाम्॥
उपश्रुतं पातुमदो मदोद्धतै-
स्त्वमेव विश्वम्भर विश्वमीशिषे।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः॥
करोति कंसादिमहीभृतां वधात्
जनो मृगाणामिव यत्तव स्तवम्।
हरे हिरण्याक्षपुरःसरासुर-
द्विपद्विषः प्रत्युत सा तिरस्क्रिया॥
प्रवृत्त एव स्वयमुज्जिभृतश्रमः
क्रमेण पेष्टुं भुवनद्विषामसि।
तथापि वाचालतया पुनक्ति मां
मियस्त्वदाभाषणलोलुपं मनः॥
तदिन्द्रसन्दिष्टमुपेन्द्र यद्वचः
क्षणं मया विश्वजनीनमुच्यते।
समस्तकार्येषु गतेन धुर्यता-
महिद्विषस्त्वद्भवता निशम्यताम्।

अभूदभूमिः प्रतिपक्षजन्मनां
भियां तनूजस्वपनद्युतिर्द्विषः ।
यमिन्द्रशब्दार्थनिसूदनं हरे-
र्हिरण्यपूर्व्वङ्कशिपुं प्रचक्षते ॥

गृह्णासि चेदिमं तुच्छमुपहारं सभे मम ।
आत्मानं सफलं मन्ये तदद्य त्वदनुग्रहात् ॥

श्रीहर्ष उवाच ।

पुण्यश्लोकनलस्यैवाश्रित्य वार्त्तां कृतं मया ।
महाकाव्यं नैषधीयचरितं दीयतेऽधुना ॥
सभासदां प्रमोदाय कियदंशं पठाम्यहम् ।
सभे तस्यानुमन्यस्व प्रार्थनेयं तवान्तिके ॥

नैषधचरितम् ।

आकुञ्चिताभ्यामथ पक्षतिभ्यां
नभोविभागात्तरसावतीर्य्य ।
निवेशदेशाततधूतपक्षः
पपात भूमावुपभैमि हंसः ॥
आकस्मिकः पक्षपुटाहतायाः
क्षितेस्तदा यः स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशः स तस्याः
सम्भ्रान्तमन्तःकरणं चकार ॥
नेत्राणि वैदर्भसुतासखीनां
विमुक्ततत्तद्विषयग्रहाणि ।
प्रापुस्तमेकं निरुपाधिरूपं
ब्रह्मेव चेतांसि यतव्रतानाम् ॥

हंसं तनौ सन्निहितं चरन्तं
मुनेर्मनोवृत्तिरिव स्विकायाम्।
ग्रहीतुकामा दरिणा शयेन
यत्नादसौ निश्चलतां जगाहे॥

तामिङ्गितैरथनुमाय माया-
मयं न भैम्या वियदुत्पपात।
तत्पाणिमालोपरिपातुकन्तु
मोघं वितेने मृतलाघवेन॥

व्यर्थीकृतं पत्ररथेन तेन
तथावसाय व्यवसायमस्याः।
परस्परामर्पितहस्ततालं
तत्कालमालीभिरहस्यतालम्॥

उच्चाटनीयः करतालिकानां
दानादिदानीं भवतीभिरेषः।
याचेति मां ह्रुचति मद्यमेव
साचेत्युपालम्भि तयालिवर्गः॥

धृताल्पकोपा हसिते सखीनां
छायेव भास्वन्तमभिप्रयातुः।
श्यामाथ हंसस्य करानवाप्ते-
र्मन्दाचलच्या लगति स्म पश्चात्॥

शस्ता न हंसाभिमुखी पुनस्ते
याचेति ताभिश्चलहस्यमाना।
साह स्म नैवाशकुनी भवेन्मे
भाविप्रियावेदक एष हंसः॥

हंसोऽप्यसौ हंसगतेः सुदत्याः
पुरः पुरश्चारु चलन् वभासे।
वैलक्ष्यहेतोर्गतिमेतदीया-
मग्रेऽनुकर्त्योपहसन्निवोच्चैः॥
पदे पदे भाविनि भाविनी तं
यथाकरप्राप्यमवैति नूनम्।
तथा सखेलं चलता लताङ्ग
प्रतार्य तेनाचकृषे कृशाङ्गी॥
रुषा निषिद्धालिजनां यदैनां
छायाद्वितीयां कलयाञ्चकार।
तदा श्रमाम्भःकणभूषिताङ्गीं
स कीरवन्मानुषवागवादीत्॥

सन्तुष्टा यदि वातुष्टा श्रुत्वा काव्यमिदं सभे।
गृहीत्वा निजमौदार्य्यमसामान्यं प्रदर्शय॥

कविराज उवाच।

राघवपाण्डवीयाख्यं महाकाव्यं कृतं मया।
रामस्य पाण्डवानाञ्च चरितं प्रति गाथया॥
ग्रन्थेऽस्मिन् वर्णितं यत्नात्तद्व्याहं ददामि ते।
कृपापरवशा भूत्वा श्लोकान् तस्य सभे शृणु॥

राघवपाण्डवीयम्।

असन्ततेः सन्ति कुतः सुखानी-
त्यस्यै विचिन्त्य प्रतिपन्नमन्युः।
समं स्वरादैर्नियतः सुतार्थं
राजा सुरंप्रार्थनतत्परोऽभूत्॥

एतस्मिन् सति समये विपत्तभीताः
क्षीराब्धेस्तटभुवमेत्य शक्रमुख्याः।
गीर्वाणाः कृतनतिहृक्कयस्त्रिधाम्ने
लोकानामुदितमुपस्रवं शशंसुः॥

सन्दिश्य त्रिदशगणं यथानुरूपं
तेजोंऽशैर्भुवि जननाय तच्च तत्र।
दैत्यारिस्वयमनु तमोनुदोऽन्वराये
क्षीरंक्षीरवतरितुं चतुर्भिरैच्छत्॥

ततो मुनिव्याहृतमन्त्रयुक्त्या
तदीयपत्नीपरिचर्य्यया च।
भक्त्योपसत्त्या च नृपस्य जज्ञे
पिण्डोपलब्धिर्विबुधप्रसादात्॥

स्फुरद्दयग्रङ्गवितताग्र्यधान्यहं
सवनान्तराप्यधिगतो महीपतिः।
चतुरोऽपि पद्मसुखभासुरश्रिय-
स्तनयानवाप हरिदश्वतेजसः॥

कृतार्थता कीदृगहो नृपस्य
यदेनमालम्बितपुत्रमूर्त्तिः।
देवः स्वयं धर्म्ममयं सिषेवे
सहानुजन्मा गुरुभक्तिनम्रः॥

स लक्ष्मणोन्नीतसमृद्धिरद्य-
च्छत्रप्रसम्पद्भरतैधितश्रीः।
ज्यायान् विरेजे क्रमशोऽभिरामः
कौमारमासाद्य वयः कुमारः॥

युधिष्ठिरं भीमधनञ्जयाभ्यां
समं दधानं नकुलेन लक्ष्मीम्।
समादवाप्तं सहदेवनिष्टं
ज्येष्टं सुतं वीक्ष्य तुतोष तातः॥
सन्तानलाभादृणः पितॄणां
हर्षादसम्भावितपूर्व्वशापः।
सार्द्धं स्वदारैरनुभूतकामः
स शक्रतोषैकरतिर्व्वभूव॥
विद्या गुरूणां निलयादवाप्य
काले कुमारा धृतराष्ट्रमेत्य।
ववन्दिरे भूमिपतिं जनानां
विलोचनालीरनिमेषयन्तः॥
गुणैरुपेता गुरुभीष्मवृद्धैः
क्षत्त्रानुरूपैर्वचनैर्विनीताः।
कृपाश्रयास्ते कुशलाः कलासु
प्रमाणकोटिप्रवणा विजज्ञुः॥
ते स्निग्धगम्भीरगिरः कुमारा-
स्त्रैलोक्यतापप्रशमाय दक्षाः।
नवाम्बुवाहा इव धार्त्तराष्ट्रा-
स्तुद्वेजयन्ति स्म चिरं विपक्षान्॥

ग्राह्यं वा यदि वाग्राह्यं इदं काव्यं सभे मम।
ग्राह्यमेव त्वया त्वं हि विद्वद्भिः परिपुष्कला॥

सूत्रक उवाच।

वसन्तसेनया सार्द्धं चारुदत्तस्य धीमतः।
प्रणयादिकमाश्रित्य वृत्तं नानारसाश्रयम्॥
मृच्छकटिकसंज्ञं हि दृश्यकाव्यं * कृतं मया।
तद्ददामि सभे तुभ्यं तस्य किञ्चिन्निशामय॥

मृच्छकटिकम्।

चारुदत्तः। ऊर्द्ध्वमवलोक्य सनिर्वेदं निःश्वस्य।

यासां बलिः सपदि मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्व्वः।
तास्वेव सम्प्रति विरूढतृणाङ्कुरासु
वीजाञ्जलिः पतति कीटमुखावलीढः॥

इति मन्दं मन्दं परिक्रम्योपविष्टः।

विदूषकः। एसो अज्जो चारुदत्तो ता जाव सम्पदं उवसप्पामि।

उपसृत्य। सोत्थि भवदे वढदु भवं।

चारुदत्तः। अये सर्व्वकालिकमित्रं मैत्रेयः प्राप्तः। सखे स्वागत-
मास्यताम्।

विदूषकः। जं भवं आणवेदि। उपविश्य। भो वअस्स एसो दे वअस्सेण चुसवुडढेण जादी-कुसुमवासिदो पावारओ अणुप्पेसिदो सिद्धीकिदएवकज्जस्स अज्जचारुदत्तस्स तुए उवणेदव्वो त्ति। समर्पयति।

---

* दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तत् रूपारोपात्तु रूपकम्॥
भवेदभिनयोऽवस्थानुकारः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्विकस्तथा।
नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥

चारुदत्तः। गृहीत्वा सचिन्तः स्थितः।

विदूषकः। भो इदं किं चिन्तीअदि।

चारुदत्तः। वयस्य

सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति॥

विदूषकः। भो वअस्स मरणादो दारिद्दादो वा कदरं दे रोअदि।

चारुदत्तः। वयस्य

दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम्।
अल्पक्लेशमरणं दारिद्र्यमनन्तकं दुःखम्॥

विदूषकः। भो वअस्स अलं सन्तप्पिदेण पणट्ठअणसंकामिदविहवस्स सुरअणपीदसेसस्स विअ पडिवन्नदस्स परिक्खओ वि दे अहिअदरं रमणीओ।

चारुदत्तः। वयस्य न ममार्थान् प्रति दैन्यम्। पश्य

एतत्तु मां दहति यद्गृहमस्मदीयं
क्षीणार्थनित्यतिथयः परिवर्जयन्ति।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः
कालात्यये मधुकराः करिणः कपोलम्॥

विदूषकः। भो वअस्स एदे क्खु दासीए पुत्ता अत्थकज्जवत्ता वरड़ाभीदा विअ गोवाल-दारआ अरण्णे जहिं जहिं ण खज्जन्ति तहिं तहिं गच्छन्ति।

चारुदत्तः। वयस्य

सत्यं न मे विभवनाशकृताऽस्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत् सौहृदादपि जनाः शिथिलीभवन्ति॥

अपि च—

दारिद्र्याद्व्ययमेति क्षीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजः परिभूयते परिभवान्निर्वेदमापद्यते।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम्॥

स्वत्पिण्डं श्रद्धया देयं सद्भिस्त्यज्यं कदापि न।
तन्मृच्छकटिकं दातुमुपहारं क्षमोऽस्मि ते॥

भट्ट उवाच।

रामायणं समाश्रित्य बालव्युत्पत्तिकारणम्।
भट्टि नाम महाकाव्यं कृतं संक्षेपतो मया॥
तव सन्तोषणार्थं तदुपहारं ददामि ते।
श्लोकान् कतिपयान् तस्य पठतो मे सभे शृणु॥

भट्टिकाव्यम्।

वनस्पतीनां सरसां नदीनां
तेजस्विनां कान्तिभृतां दिशाञ्च।
निर्याय तस्याः स पुरः समन्तात्
श्रियं दधानां शरदं ददर्श॥
तरङ्गसङ्गाच्चपलैः पलाशै-
र्ज्वालाश्रियं सातिशयान्दधन्ति।
सधूमदीप्ताग्निरुचीनि रेजु-
स्ताम्रोत्पलान्याकुलषट्पदानि॥
विस्रागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः।
कूलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः॥

निशातुषारैर्नयनाम्बुकल्पै:
पत्रान्तपर्य्यागलदच्छबिन्दुः ।
उपारुरोदेव नदत्यतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ ॥
वनानि तोयानि च नेत्रकल्पै:
पुष्पैः सरोजैश्च निलीनभृङ्गैः ।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥
प्रभातवाताहतिकम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम् ।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनीयं सहतेऽन्यसङ्गमम् ॥
दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित् ॥
गिरेर्नितम्बे मरुता विभिन्नं
तोयावशेषेण हिमाभमम्बम् ।
सरिन्मुखाभ्युच्चयमादधानं
शैलाधिपस्यानुचकार लक्ष्मीम् ॥
गर्जन् हरिः साम्भसि शैलकुञ्जे
प्रतिध्वनीनात्मकृतान्निशम्य ।
क्रमं बबन्ध क्रमितुं सकोपः
प्रतर्कयन्नन्यमृगेन्द्रनादान् ॥

अदत्तताम्राणि नवोत्पलानि
कृतानि चाशोषत षट्पदानाम्।
आघ्रायिवान् गन्धवहः सुगन्ध-
स्तेनारविन्दव्यतिषङ्गवांश्च॥
लतानुपातं कुसुमान्यगट्छात्
स नद्यवस्कन्दमुपास्पृशच्च।
कुद्दालशाद्वारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त॥
तिग्मांशुरश्मिच्छुरितान्यदूरात्
प्राच्चि प्रभाते सलिलान्यपश्यत्।
गभस्तिधाराभिरिव द्रुतानि
तेजांसि भानोर्भुवि सम्भृतानि॥

वज्रदूरात् समागत्य उपहारं ददामि यत्।
इदं काव्यं सभे तुभ्यं अतो न व्यक्तुमर्हसि॥

दण्डी उवाच।

दशानां राजपुत्राणामाश्रित्य चरितं मया।
दशकुमारचरितं गद्यकाव्यं* कृतं सभे॥
सभाजनाय सभ्यानामुपहारं ददामि तत्।
तस्य किञ्चित् प्रयत्नेन पठतो मे निशामय॥

दशकुमारचरितम्।

अस्ति समस्तनगरीनिकषायमाणा शश्वद्गण्यपण्यविस्तारितमणिगणादिवस्तुजात-व्याख्या-तरत्नाकरमाहात्म्या मगधदेशशेखरीभूता पुष्पपुरी नाम नगरी। तत्र वीरभटपटलोत्तरङ्ग-तुरङ्गकुञ्जरमकरभीषणसकलरिपुगणकटकजलनिधिमथनमन्दरायमाणसमुद्दण्डभुजदण्डमण्डनः

* दत्तवन्योजिभर्तृ गद्यं * * * * *।

पुरन्दरपुराङ्गनवनविहरणपरायणतरुणगणिकागणजेगीयमानयातिमानया शरदिन्दुकुन्दघनसारनीहारहारमृणालमरालसुरगजनीरक्षीरगिरीशाट्टहासकैलासकाशनीकाशश्मश्रुर्त्या रचितदिगन्तरालपूर्त्या कीर्त्याभितः सुरभितः स्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलावलयितधरणीरमणीसौभाग्यभोग्यभाग्यवाननवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासम्भारभासुरभूसुरनिकरो विरचितारातिसन्तापेन प्रतापेन सततततुलितविपन्मध्यहंसो राजहंसो घनदर्पकन्दर्पसौन्दर्य्यसौदर्य्यहृद्यनिरवद्यरूपो भूपो बभूव। तस्य वसुमती नाम सुमतिर्लीलावतीकुलशेखरमणी रमणी बभूव। निटिलाक्षेण भस्मीकृतचेतने मकरकेतने तदा भयेनानवद्या वनितेति मत्वा तस्या रोरम्बावलीकेशजालं प्रेमाकरो रजनीकरो विजितारविन्दं वदनं जयध्वजायमानो मीनो जायायुतोऽक्षियुगलं सकलसैनिकाङ्गवीरो मलयसमीरो निश्वासः पथिकहृद्दलनः करवालप्रवालश्चाधरविम्बं जयशङ्खो वन्धुरालावण्यधरा कन्धरा पूर्णकुम्भौ चक्रवाकानुकारौ पयोधरौ ज्यायमाने मार्द्दवासमाने विसलते बाह्वं ईषदुत्फुल्लनीलावतंसकङ्कारो गङ्गावर्त्तसनाभिर्नाभिः दूरीकृतयोगिमनोरथो जैत्ररथोऽतिघनञ्जघनं जयस्तम्भभूते सौन्दर्य्यभूते विभ्रितयतिजनारम्भे रम्भे चोरुयुगे आतपत्रसहस्रपत्रं पाद्द्वयमस्त्रभूतानि प्रसूतानि तानीतराणि अङ्गानि समभूवन्निव विजितामरपुरे पुष्पपुरे निवसती सा वसुमती वसुमतीव मगधराजेन यथासुखमन्वभावि। तस्य राज्ञः परमविधेयाः (धर्म्मपालपद्मोद्भवसितवर्म्मनामधेयाः) धीरधीषणावधीरितविबुधाचार्य्यविचार्य्यप्रकार्य्यसाचिव्याः कुलामात्यास्त्रयोऽभूवन्। तेषां सितवर्म्मणः (सुमतिसत्यवर्म्माणौ) धर्म्मपालस्य (सुमन्त्रसुमित्रकामपालाः) पद्मोद्भवस्य (सुश्रुतरत्नोद्भवाविति) तनयाः समभूवन्। तेषु धर्म्मशीलः सत्यवर्म्मा संसारासारतां बुद्धा तीर्थयात्राभिलाषी देशान्तरमगमत्। विटनटवारनारीपरायणो दुर्विनीतः कामपालः जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारावारतरणमकरोत्। इतरे मन्त्रिसूनवः पुरन्दरपुरातिथिषु पितृषु यथापूर्व्वमन्वतिष्टन्। ततः कदाचिन्नानाविधमहदायुधनैपुण्यरचितागण्यजन्याजन्यमौलिपालिपालिनिहितनिशितशायको मगधनायको मालवेश्वरं प्रत्यग्रसंग्रामधक्षुरं समुत्कटमानसारं

मानसारम्भति सहेलन्यक्कृतजलधिनिर्घोषाहङ्कारेण भेरीझङ्कारेण हटिकाकर्णनाक्रान्तभयचण्डिमानं दिग्दन्तावलवलयं विघूर्णयन् निजभरनमन्मेदिनीभरेणायस्तभुजगराजमस्तकवलेन चतुरङ्गबलेन संयुतः संग्रामाभिलाषेण रोषेण महताविष्टो निर्ययौ।

दण्डोऽपि भवद्विद्वेषी पूजार्थं केवलं तव।
उपहारं ददाम्येतत् गृहाण कृपया सभे॥

जयदेव उवाच।

इदं गीतिमहाकाव्यं गीतगोविन्दसंज्ञकम्।
मया यत्नात् कृतं राधाकृष्णप्रेमरसाश्रयम।
ग्रन्थेऽस्मिन् रागतालानां विचित्रत्वं प्रदर्शितम्।
ददाम्येतत् सभे तुभ्यं गीतान्यस्य निशामय॥

गीतगोविन्दम्।

वसन्तरागरूपकतालाभ्यां गीयते।

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे॥
विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥
उन्मदमदनमनोरथपथिकवधूजनजनितविलापे।
अलिकुलसङ्कुलकुसुमसमूहनिराकुलवकुलकलापे॥
मृगमदसौरभरभसवशंवदनवदलमालतमाले।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले॥
मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे।
मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे॥
विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे॥

माधविकापरिमललिलतनवमालतिजातिसुगन्धौ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ॥
स्फुटदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते॥
श्रीजयदेवभणितमिदमुदयतु हरिचरणस्मृतिसारम्।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम्॥

कर्णाटरागैकतालीतालाभ्यां गीयते।

निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरम्।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्॥
सा विरहेण तव दीना माधव।
मनसिजविशिखभयादिव भावनया त्वयि लीना॥
अविरलनिपतितमदनशरादिव भवदवनाय विशालम्।
स्वहृदयमर्म्मणि वर्म्म करोति सजलनलिनीदलजालम्॥
कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम्॥
वहति च गलितविलोचनजलधरमाननकमलमुदारम्।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम्॥
विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम्।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम्॥
प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम्।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम्॥
ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम्।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम्॥
श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम्।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम्॥

देशाखरागैकतालीतालाभ्यां गीयते।

स्तनविनिहितमपि हारमुदारम्। सा मनुते कृशतनुरिव भारम्॥
राधिका तव विरहे केशव!
सरसमसृणमपि मलयजपङ्कम्। पश्यति विषमिव वपुषि सशङ्कम्॥
श्वसितपवनमनुपमपरिणाहम्। मदनदहनमिव वहति सदाहम्॥
दिशि दिशि किरति सजलकणजालम्। नयननलिनमिव विगलितनालम्॥
नयनविषयमपि किसलयतल्पम्। कलयति विहितहुताशविकल्पम्॥
त्यजति न पाणितलेन कपोलम्। बालशशिनमिव सायमलोलम्॥
हरिरिति हरिरिति जपति सकामम्। विरहविहितमरणेव निकामम्।
श्रीजयदेवभणितमिति गीतम्। सुखयतु केशवपदमुपनीतम्॥

रसभावविहीनाय गीतिकाव्याय मे सभे।
अवस्थानाय त्वत्पार्श्वे स्थानं दातुं त्वमर्हसि॥

चिरञ्जीव उवाच।

सर्वेषां वैष्णवादीनां दर्शनानां विशेषतः।
मतमाश्रित्य यत्नेन विद्वन्मोदतरङ्गिणी॥
चम्पूकाव्यं* कृतं तुभ्यं उपहारं ददाम्यहम्।
सभे तस्य कियानंशः श्रूयतां प्रकृते मया॥

विद्वन्मोदतरङ्गिणी।

अथ समाहूताः पुरुहूतपुरोहिता इव विद्वांसः क्रमशः प्रविशन्तिस्म।

तत्र प्रथमतः प्रविशन्तं वैष्णवमालोक्य कोऽप्येकः सकलजनाभिज्ञो विदित-परतत्त्वो निजगाद प्रभुम्।

---

* गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।

आनाभ्रूर्द्ध्वतिलकी वज्रशङ्खचक्र-
पद्माङ्कितोज्ज्वलवपुर्धृतपीतवासाः ।
कण्ठे ललामतुलसीस्रजमादधानः
श्रीमानयं हरिकथां कथयन्नुपैति ॥

प्रविश्य च वर्षावः—

दूषन्मुद्रितलोचनो दृढतरप्रारब्धयोगासनो
यद्ब्रह्मादिसुरेन्द्रवन्दितपदः शम्भुः स्वयं ध्यायति ।
वैकुण्ठैकनिकेतनं जगदपि व्याप्य स्थितं लीलया
तद्ब्रह्माख्यवपुः सदैवमुदितं लच्चित्तमालम्बताम् ॥

इत्यग्रे ।

अथायान्तं शैवमालोक्याह सः—

श्रीमानसावेति जटालमौलि-
व्यांग्रत्वगालम्बितमध्यभागः ।
विभूतिसम्भूषितभास्वदङ्गो
रुद्राक्षमालाकलितोर्द्ध्वदेहः ॥

प्रविश्य च शैवः—

यं गायन्ति सदा समस्तनिगमा ध्यायन्ति यं योगिनो
यस्याश्रामधिगत्य दैवतगणाः कुर्व्वन्ति रक्षादिकम् ।
सोऽयं त्वामवतात् निराकृतिरपि चातुं जगत् साकृति-
र्ध्यायन् स्वं स्वयमेव सर्व्वजगतीशिक्षाकरः शङ्करः ॥

इत्यग्रे ।

अथायान्तं शाक्तमालोक्याह सः—

जवापुष्पं मूर्द्ध्नि स्रजमुरसि मल्लीसुमनसां
ललाटेऽप्यारक्तं तिलकमनुलिप्तं मलयजम् ।
दधानः सानन्दं निजहृदि परब्रह्ममहिषीं
समायातः साक्षादधर इव राकापतिरयम् ॥

प्रविश्य च शाक्तः—

यामासाद्य विधीयते हरिहरब्रह्मादिभिर्दैवतैः
स्वीयं स्वीयमतीव दुष्करतरं कर्म्म क्षणाल्लीलया।
सा दुर्गा भवरीतिभीतिशमनी लोकत्रयात्तारिणी
भूयाद्वः प्रतिपक्षपक्षदलनी वाञ्छाफलोल्लासिनी॥

इत्यादे।

अथायान्तं हरिहराद्वैतवादिनमालोक्याह सः—

अयमितस्तुलसीदलमालया
कलिलभस्मललामकलेवरः।
हरिहरौ शरणीकरवाणिता-
वितिविभावनभाषणतत्परः॥

आगत्य सः—

ब्रह्माविष्टमनाः सदैव कमलासक्तोऽविषादो विभुः
कावासोऽथ विभूतिमान् गिरिवराधारोऽभयावल्लभः।
सर्पाधीशधरो विपुङ्गवचरो लोकत्रयानन्दको
भूयाद्वो हृदयं गतः प्रतिलवं कृष्णोऽथवा शङ्करः॥

इत्यादे।

यतस्त्वं विदुषां वर्गैर्मण्डिता तत्सभे मम।
उपहारमिमं त्यक्तुं कस्मिन् कालेऽपि नार्हसि॥

मयूरभट्ट उवाच।

सूर्य्यशतकसंज्ञं हि खण्डकाव्यं * मया कृतम्।
जगत्प्रसवितुस्तत्र सूर्य्यस्य रश्मिमण्डलम्॥
रथाश्वौ सारथिश्चैव वर्णितास्तु कृतः स्तवः।
तुभ्यं ददामि तत् तस्य कियदंशं सभे शृणु॥

---

* खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च।

सूर्य्यशतकम् ।

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सक्तैरिवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकालं कमलवनरुचे वारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥
भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां
लक्ष्मीमाकर्षुकामा इव कमलवनोद्घाटनं कुर्वते ये ।
कालाकारान्धकारानन्पतितजगत्साध्वसध्वंसकल्पाः
कल्याणं वः क्रियासुः किसलयनिचयस्ते करा भास्करस्य ॥
गर्भेष्वम्भोरुहाणां शिखरिषु च शिलाग्रेषु तुल्यं पतन्तः
प्रारम्भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव ।
निष्पर्यायं प्रवृत्तास्त्रिभुवनभवनप्राङ्गणे पान्तु युष्मान्
उष्णानं सन्ततास्त्रश्रमजमिव भृशं बिभ्रतो ब्रध्नपादाः ॥
प्रभ्रस्यत्युत्तरीयत्विषि तमसि समुद्वीक्ष्य वीताटतीन् प्राग्
जन्तूंस्तन्तून् यथा यानतनु वितनुते तिग्मरोचिर्मरीचीन् ।
ते सान्द्रीभूय सद्यः क्रमविशददशाशारदशालीविशालं
शश्वत् सम्पादयन्तोऽम्बरममलमलं मङ्गलं वो दिशन्तु ॥
व्यक्तुर्वन्नोषधीशे मुषितरुचिशुचेवौषधीः प्रेषिताभा
भास्वद्ग्रावोद्गतेन प्रथममिव कृताभ्युद्गतिः पावकेन ।
पक्षच्छेदव्रणास्रक्स्रुत इव दृषदो दर्शयन् प्रातरद्रे-
रातास्रस्रीवभानोरनभिमतनुदेस्तद्गभस्तिग्रहो वः ॥
शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपवनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानवौघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनतृणानिघ्ननिर्विघ्नवृत्ते-
र्दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमङ्गोविघातम् ॥

विभ्राणा वामनत्वं प्रथममथ तथैवांशवः प्रांशवो वः
क्रान्ताकाशान्तरालास्तदनु दशदिशः पूरयन्तस्ततोऽपि।
ध्वान्तादाच्छिद्य देवद्विष इव वलितो विश्वमाश्वश्नुवानः
क्रूरक्रान्तानुक्रायहेलावहसितहरयो हारिदश्वा हरन्तु॥
उद्गाढेनारुणिम्ना विदधति वडवं येऽरुणस्यारुणत्वं
मूर्द्धोद्भूतौखलीनच्छतरुधिररुचो ये रथाश्वाननेषु।
शैलानां शेखरत्वं श्रितशिखरिशिखास्तन्वते ये दिशन्तु
प्रेङ्खन्तः खे खरांशोः खचितदिनमुखास्ते मयूखाः सुखं वः॥
दत्तानन्दाः प्रजानां समुचितसमयाकृष्टसृष्टैः पयोभिः
पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यङ्कि संहारभाजः।
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो
गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु॥
बध्नध्वं सैकहेतुं शिरसि नतिवशाबद्धसन्ध्याञ्जलीनां
लोकानां ये प्रबोधं विदधति विपुलाम्भोजषण्डाशयेव।
ते युष्माकं स्वचित्तप्रथिमधृतुतरप्रार्थनाकल्पवृक्षाः
कल्पन्तां निर्विकल्पं दिनकरकिरणाः केतवः कल्मषस्य॥
धारारायोऽधनायापदि सपदि करालस्वभूताः प्रपाते
तत्त्वालोकैकदीपास्त्रिदिवपतिपुरप्रस्थितौ वीथ्य एव।
निर्वाणोद्योगियोगिप्रगमनिजतनुद्वारि वेचायमाणा
स्त्रायन्तां तीव्रभानोर्दिवसमुखसुखारम्भयः कल्मषाद्रेः॥
प्राचि प्रागाचरन्त्योऽनतिचिरमचले चारुचूडामणित्वं
मुञ्चन्त्यो रोचनाम्बु प्रचुरमिव दिशामुज्ज्वलैश्चर्चना च।
चाटूत्कैश्चकनाम्नां चतुरमविचलैर्लोचनैरर्च्यमाना-
श्चेष्टन्तां चिन्तितानामुचितमचरमाश्चण्डरोचीरचो वः॥

यत्नैर्देयं महाक्षुद्रं न त्यजन्ति महाशयाः।
अतः क्षुद्रतमं काव्यमुपहारं गृहाण मे॥

भवभूतिरुवाच।

उत्तरं रामचरितं सीतानिर्वासनाश्रयम्।
करुणाख्यरसप्रायं दृश्यकाव्यं मया कृतम्॥
त्वन्मोदोत्पादनार्थं तत्प्रीतिपूर्वं ददामि ते।
कियदंशं सभे तस्य समाकर्णय साम्प्रतम्॥

उत्तरचरितम्।

रामः। हा कष्टम्।

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्य्यं हरीणां वृथा
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोरपि।
मार्गं यत्र न विघ्नकर्म्मतनयः कर्त्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्निणामविषये तत्र प्रिये क्वासि मे॥

सीता। वज्ज मन्नाविदच्छि पूव्वविरहं।

रामः। सखि वासन्ति दुःखायैवेदानीं रामस्य दर्शनं सुहृदां कियच्चिरं त्वां रोदयिष्यामि तदनुजानीहि मां गमनाय।

सीता। (सोदेगमोहं तमसामवलम्ब्य) भअवदि तमसे कहं गच्छदि एव्व अज्जउत्तो।

तमसा। वत्से समाश्वसिहि समाश्वसिहि। नन्वावामपि आयुष्मतोः कुशलवयोर्वधूग्रन्थिमङ्गलं सम्पादयितुं भागीरथीपदान्तिकमेव गच्छावः।

सीता। भअवदि पसीद खणमेत्तं वि दाव दुल्लहं जणं पेक्खामि।

रामः। अस्ति चेदानीमश्वमेधाय सहधर्म्मचारिणी मे—

सीता। (सोत्कम्पं) अज्जउत्त का सा।

रामः। हिरण्मयी सीताप्रतिकृतिः।

सीता। (सोच्छ्वासं साश्रु) अज्जउत्तो दाणिं सि तुमं। अम्महे उक्खाणिदं मे दाणिं परिच्चाअलज्जासल्लं अज्जउत्तेण।

रामः। तत्रापि तावद्दाष्यदिग्धं चक्षुर्विनोदयामि।

सीता। धणा सा जा अज्जउत्तेण वङ्क मणाअदि जा अ अज्जउत्तं विणोदअन्ती आसाणिवत्तणं जादा जीअलोअस्स।

तमसा। (सस्मितमुपहासं परिष्वज्य) अयि वत्से एवमात्मा स्तूयते।

सीता। (सलज्जमधोमुखी स्वगतम्) परिहसिदम्हि भअवदीए।

वासन्ती। महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति पुनर्यथा कार्यपरिहाणिर्न भवति तथास्ताम्।

सीता। पढ़िउला दाणिं मे वासन्ती संवुत्ता।

तमसा। एहि वत्से गच्छावः।

सीता। (सकरुणम्) एवं करेम्ह।

तमसा। कथं वा गम्यते यस्यास्तव

प्रत्युप्तस्येव रचिते तृष्णादीर्घस्य चक्षुषः।
मर्म्मच्छेदपरैर्यत्नैराकर्षो न समाप्यते॥

सीता। णमो णमो अपुव्वपुरुसजणिदद्दंसणाणं अज्जउत्तचरणकमलाणं। मूर्च्छति।

भवभर्तरिमां भूतिं विहीनधनसम्पदः।
उपहारीकृतां यत्नात् गृहाण समितेऽधुना॥

सूत्रधार उवाच।

कन्दर्पकेतुर्गुणवान् चिन्तामणिनृपात्मजः।
येन वासवदत्तां हि प्राप तद्वृत्तसंश्रितम्॥
कृतं वासवदत्ताख्यं गद्यकाव्यं मया सभे।
ददामि ते कञ्चिदंशं शृणु तस्य समाहिता॥

वासवदत्ता।

विबुद्धस्तु विषसरसीव दुर्जनवचसीव निमग्नमात्मानं धारयितुं न शशाक। तथाहि क्षणमाकाशतलमालिङ्गन् प्रसारितबाहुयुगलः एह्येहि प्रियतमे क्व गच्छसीति दिक्षु लिखिता-

मिवोत्कीर्णामिव चक्षुषि निखातामिव हृदये प्रियतमामाजुहाव। ततस्तत्रैव शय्यातले निमीलितनयनो निषिद्धाशेषपरिजनो दत्तकपाटः परिहृतताम्बूलाहारादिसकलोपभोगस्तद्दिनमनयत्। तथैव निशामपि स्वप्नसमागमेच्छाभिरनैषीत्। अथ तस्य प्रियसखो मकरन्दो नाम कथमपि लब्धप्रवेशः कन्दर्पसायकप्रहारपरवशं कन्दर्पकेतुमुवाच। सखे किमिदमसाम्प्रतमसाधुजनोचितमध्यानमाश्रितोऽसि तवैतच्चरितमालोक्य वितर्कदोलासु निवसन्ति सन्तः खलाः पुनस्तदनिष्टमनुचितमेवावधारयन्त्यनिष्टोद्भावनरसोत्तरं हि खलहृदयं को नामास्य तत्त्वनिरूपणे समर्थः। तथाहि भीमोऽपि न वकद्वेष्याश्रयाशोऽपि मातरिश्वा अतिकटुरपि मलयरसः सर्षपस्नेह इव करयुगललालितोऽपि शिरसा धृतोऽपि न कटुत्वं जहाति तालफलरस इवापातमधुरः परिणामविरसस्निग्धश्च पादपराग इवावधूतो मूर्द्धानं कषाययति विषतरुप्रसव इव यथा यथानुभूयते तथा तथा मोहमेव द्रढ़यति न वारि विरक्तोऽस्य जायते नीचदेशस्येव निदाघदिवस इव वज्रमत्सरो वहति तापं सुमनसां अन्धकार इव दोषानुवन्धचतुरो विश्वकर्मावलोपनोद्यतश्च विरूपाक्षोऽपि चक्रधरः शक्राश्व इवोच्चैःश्रवा न देशजप्रशंसी च सरसेरव विभिन्नसत्रापि सतः स्नेहं दर्शयतोऽपि तक्राट इव हृदयं विलोड़यति यक्षबलिरिवात्मघोषमुखरो मण्डलभ्रमणकथकश्च मत्तमातङ्ग इव स्ववशालोलमुखोऽधरीकृतदानश्च वृषभ इव सुरभियानविकलः कामीव गोत्रस्खलनविधुरो वामाध्वानुरक्तश्च अजीर्णविकार इव कलेवरे वचसि मन्दिमानमावहति वञ्चक इव कटपाले रक्तो विभावरीरक्तश्च परेत इव बन्धुतापदर्शनः परशुरिव भद्रश्रियमपि खण्डयति कुद्दाल इव दलितगोचः क्षमाभाजः प्राणिनो निकृन्तति रतकील इव जघन्यकर्म्मलग्नो क्षेपयति साधून् दुष्टभुर्पश्रुतिरिव काननरुचिरनुगतमपि वसन्ततं नानुमोदते। अबीजादेव जायन्ते अकाण्डादेव प्ररोहन्ति खलव्यसनाङ्कुरा दुरुच्छेदा भवन्ति असतां हि हृदि प्रविष्टो दोषलवः करालायते। सतां तु हृदि न विशत्येव यदि कदाचिद्विशति पारद इव क्षणमात्रमपि नावतिष्ठते। साधवो मृगा इव विनोदविन्दोः श्रवणवशगाः सुखं जनाः शरत्समया इव भवादृशा मित्रस्य हृदयं हरन्ति न च सचेतना विसदृशमुपदिशन्त्यचेत-

नानामपि मैत्री समुचितपक्षे निक्षिप्ता। तथाहि माधुर्य्यश्लेष्मशुचित्वसन्तापशान्तिभिः पयः पय इवेति मित्रतामुपगतस्य दुग्धस्य तत्सङ्गमाद्वर्द्धितस्य क्वाथेन ममैव पुरो युक्तः क्षय इति विचिन्त्येव वारिणापि क्षीयते। तदिदमसाम्प्रतमाचरितं। सखे गृह्यतां साधुजनोचितमध्वानं साधवो हि दिङ्मोहात् परमुत्पथप्रवृत्ता भवन्तीत्यादि वदति तस्मिन् कथमपि खरशरनिकरप्रहारपरवशः परिमिताक्षरमुवाच कन्दर्पकेतुः।

वासवस्य सभातुल्या यतस्त्वं समिते ततः।
इमां वासवदत्तां मे गृहाणोपहृतीकृताम्॥

बाणभट्टस्तत्सुतश्च उवाच।

तारापीड़सुतश्चन्द्रापीड़ो गन्धर्व्वदारिकाम्।
कादम्बरीं यथा प्राप तद्वृत्तान्तसमाश्रयम्॥
आवाभ्यां हि कृतं गद्यकाव्यं तुभ्यं बुधाश्रये।
प्रयच्छावः कञ्चिदंशं सभे तस्य निशामय॥

कादम्बरी।

अतिनिशीथप्रभावात् दूरादेव विभाव्यमानस्वरमुन्मुक्तार्त्तनादम् हा हतोऽस्मि हा दग्धोऽस्मि हा वञ्चितोऽस्मि हा किमिदमापतितं किं वृत्तं उत्पन्नोऽस्मि दुरात्मन् मदन पिशाच पाप निर्घृण किमिदमकृत्यमनुष्ठितम् आः पापे दुष्कृतकारिणि मच्चाक्षते दुर्विनीते किमनेन तेऽपकृतम् आः पाप दुश्चरित चन्द्र चण्डाल कृतार्थोऽसि। इदानीमपगतदाक्षिण्यदक्षिणानिलहृतक पूर्णास्ते मनोरथाः कृतं कर्त्तव्यं वहेदानीं यथेष्टम्। हा भगवान् श्वेतकेतो पुत्रवत्सल न वेत्सि सुषितमात्मानम् हा धर्म्म निष्परिग्रहोऽसि हा तपो निराश्रयमसि हा सरस्वति विधवासि हा सत्य अनाथमसि हा सुरलोक शून्योऽसि सखे प्रतिपालय मामहमपि भवन्तमनुयास्यामि न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी कथमपरिचित इवाहृष्टपूर्व्व इवाद्य मामेकपदे उत्सृज्य प्रयासि कुतस्त्वेयमतिनिष्ठुरता कथय त्वरते क्व गच्छामि कं याचे कं

शरणमुपैमि अन्धोऽस्मि संवृत्तः शून्या मे दिशो जाताः निरर्थकजीवितमप्रयोजनं तपः निःसुखाश्च लोकाः केन सह परिभ्रमामि कमालपामि उत्तिष्ठ देहि मे विलपतः प्रतिवचनं क्व तन्ममोपरि सुहृत्स्नेह क्व सा स्मितपूर्वाभिभाषिता च इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम्।

अप्युन्मत्तिके कुतोऽस्य मे वज्रसारकठिनस्य हृदयस्य स्फुटनम् आलोक्यैव यन्न सहस्रधा स्फुटितम्। अपि च या जीवति तस्याः सर्व्वमिदं माता पिता बन्धुरात्मा सख्यः परिजन इति मया पुनर्म्रियमाणया जीवितभूतं कथमपि समासादितमिदं प्रियतमशरीरं यज्जीवदजीवद्वा सम्भोगेनानुमरणेन वा द्विधापि सर्व्वदुःखानामेवोपशान्तये तत् किमिति देवेनागच्छता मदर्थं प्राणांश्चोत्सृजता सुदूरमारोपितम् गुरुताश्च नीतमात्मानमश्रुपतनमात्रकेण लघूकृत्य पातयामि कथञ्च स्वर्गगमनोन्मुखस्य देवस्य रुदितेनामङ्गलं करोमि कथं वा पादधूलिरिव पादावनुगन्तुमुद्यता हर्षस्थाने रोदिमि किं मे दुःखम् अधुना तु मे सर्व्वदुःखान्येव दूरीभूतानि किमद्यापि रुद्यते यदर्थं कुलक्रमो न गणितो गुरवो नापेक्षिताः धर्म्मो नानुरुद्धो जनापवादान्न भीतं लज्जा परित्यक्ता मदनोपचारैः सखीजनः खेदितो दुःखिता मे प्रियसखी महाश्वेता तस्याः कृते प्रतिज्ञातमप्यन्यथा जातम् ममेत्येतदपि चेतसि न कृतं तस्मिन् मदर्थमेवोज्झितप्राणे प्राणेश्वरे प्राणान् प्रतिपालयन्ती त्वयैवं किमुक्ताहं अस्मिंस्तु समये मरणमेव श्रेयो न जीवितं मे सर्व्वप्रकारलज्जाकरन्तु जीवितं न पुनर्मरणम्। तद्यदि ममोपरि स्नेहः करोषि वा मत्प्रियहितं तन्मदीयमप्यात्मनि स्नेहमारोप्य तथा कर्त्तव्यं यथा न तातो नाम्बा वा मच्छोकादात्मानं परित्यजतः।

कादम्बरीं विना यन्न भवेत् प्रकृतिसाधनम्।
अतः कादम्बरीं गोष्ठि उपहारं गृहाण नौ॥

भर्तृहरिरुवाच।

विषयाणामनित्यत्वं ज्ञात्वा शान्तिरसाश्रयम्।
लोकानामुपदेशाय वैराग्यशतकं लघु॥
मया कृतं कोषकाव्यं* सभे तुभ्यं ददामि तत्।
वच्मि तस्य कतिश्लोकान् तान् शृण्वन्तु सभासदः॥

वैराग्यशतकम्।

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥
न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः।
महद्भिः पुण्यौघैश्चिरमपि गृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिनाम्॥
भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित् फलं
त्यक्ता जातिकुलाभिमानमुचितं सेवाकृता निष्फला।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि॥
अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किन्नास्माभिर्विगलितविवेकैर्व्यवसितम्।
पदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि॥
भोगा न भुक्ता वयमेव भुक्ताः
तपो न तप्तं वयमेव तप्ताः।

* कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः।
व्रज्याक्रमेण रचितः स एवातिमनोरमः॥

कालो न यातो वयमेव याताः
तृष्णा न जीर्णा वयमेव जीर्णाः ॥

वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥

निष्टप्ता भोगेच्छा पुरुषवयमानोऽपि गलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो दुष्टः कायस्तदपि मरणोपायचकितः ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धर्मद्रुमध्वंसिनी ।
मोहावर्त्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत् स्वयमसून् ।
व्रजन्तः स्वातन्त्र्यात्तुलपरितापाय मनसः
स्वयन्त्यक्ताः खेते शमसुखमनन्तं विदधति ॥

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चत्युपभोगभाञ्जपि धनान्येकान्ततो निस्पृहाः ।
सम्प्राप्तानि पुरा न सम्प्रति न च प्राप्तौ दृढप्रत्ययो
वाञ्छामात्रपरिग्रहाख्यपि परित्यक्तुन्न शक्ता वयम् ॥

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायताम्
आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकन्तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥

स्तनौ मांसग्रन्थी कनककलसावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम्।
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्द्धि जघनं
मुजर्निन्द्यं रूपं कविवरविशेषैर्गुरुकृतम्॥

नीरसं यदि मे काव्यं मत्वा गृह्णासि नो सभे।
ततो दुःखार्णवे मग्नो भविष्यामि न संशयः॥

विशाखदेव उवाच।

नन्दवंशसमुच्छेदश्चन्द्रगुप्ताभिषेचनम्।
चाणक्यनीतिकौटिल्यं एतद्वृत्तान्तसंश्रितम्॥
मया कृतं दृश्यकाव्यं मुद्राराक्षससंज्ञकम्।
सभे ददामि तत्तुभ्यं तदंशः कथ्यते मया॥

मुद्राराक्षसम्।

चाणक्यः। दृष्ट इदृश खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानम्। तद्यथा अनुग्रहो निग्रहश्चेति। अनुग्रहस्तावदाच्छिन्नाधिकारयोर्भद्रभटपुरुषदत्तयोः पुनरधिकारारोपणमेव। अधिकारश्च पुनस्तादृशेषु व्यसनदोषादनभियुक्तेषु पुनरारोप्यमाणः सकलस्यैव राज्यस्य मूलं हस्त्यश्वमवसादयति। द्विड्बलातबलगुप्तयोरत्यन्तलुब्धप्रकृतिकयोः सकलराज्यसम्प्रदानेनाप्यपरितुष्यतोरनुग्रहः कथं कर्त्तुं शक्यते राजसेनभागुरायणयोस्तु स्वधनप्राणनाशभीतयोः कुतोऽनुग्रहसम्भावकाशः रोहिताक्षविजयवर्म्मणोरपि दायादमानप्रदानपीड़ितयोर्मानमप्यपमानं मन्यमानयोः अत्यन्तमानिनोः कीदृशोऽनुग्रहः प्रीतिं जनयिष्यतीति परिहृतः पूर्व्वः पक्षः। उत्तरोऽपि खलु वयमचिरादधिगतनन्दैश्वर्य्याः सहोत्थायिनं प्रधानपुरुषवर्गमुग्रेण दण्डेन पीड़यन्तो नन्दकुलानुरक्तानां प्रकृतीनामविश्वास्या मा भवाम इत्यतः परिहृत एव। तदेवमनुगृहीतास्तद्भृत्यपक्षो राक्षसोपदेशश्रवणप्रवणो महीयसा

म्लेच्छराजबलेन परिवृतः पितृवधामर्षितः पर्व्वतकपुत्रो मलयकेतुरस्मानभियोक्तुमुद्यत इति सोऽयं व्यायामकालो नोत्सवकाल इति! अतो दुर्गसंस्कारे आरब्धव्ये किं कौमुदी-महोत्सवेनेति प्रतिषिद्धः।

राजा। आर्य्य वज्रप्रष्टव्यमत्र।

चाणक्यः। वृषल विश्रब्धं पृच्छ ममापि वक्तव्येयमत्र।

राजा। एषं पृच्छामि।

चाणक्यः। अहमप्येष कथयामि।

राजा। योऽयमस्माकमस्य सर्व्वस्यैवानर्थहेतुर्मलयकेतुः स कस्मादार्य्येणापक्राम-न्नुपेक्षितः।

चाणक्यः। वृषल मलयकेतोरपक्रमणानुपेक्षणे द्वयी गतिः स्यात् अनुगृह्येत निगृह्येत वा। अनुग्रहे पूर्व्वप्रतिश्रुतं राज्यार्द्धं प्रतिपाद्येत। निग्रहे तावदस्य पर्व्वतकोऽस्माभिर्व्यापादित इति कृतघ्नतायाः स्वयं हस्तो दत्तः स्यात्। प्रतिश्रुतार्द्धराज्यप्रतिपादनेऽपि पर्व्वतकविनाशः केवलं कृतघ्नतामात्रफलः स्यात् इति मलयकेतुरपक्रामन्नुपेक्षितः।

राजा। आर्य्य अत्र तावदेवम्। राक्षसः पुनरिहैवान्तर्नगरे वर्त्तमान आर्य्येणोपेक्षित इत्यत्र किमुत्तरमार्य्यस्य।

चाणक्यः। वृषल राक्षसोऽपि खलु निजस्वामिनि स्थिरानुरागित्वात् सुचिरमेवात्र सहवासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनामत्यन्तं विश्वासयः प्रज्ञापुरुषकाराभ्यामुपेतः सहायसम्पदा युक्तः कोषबलानिहैवान्तर्नगरे वर्त्तमानो महान्तं खल्वन्तःकोपमुत्पादयेत्। दूरीकृतस्तु बाह्यकोपमुत्पादयन्नपि न दुःखसाध्यो भविष्यतीत्यतोऽपक्रामन्नुपेक्षितः।

वज्रयत्नैरयं ग्रन्थो यतस्ते दीयते मया।
उपहारस्ततो ग्राह्यः सामान्योऽपि सभे त्वया॥

विष्णुशर्म्मोवाच।

बालानां नीतिशिक्षार्थं उपदेशसमाकुलम्।
हितोपदेशोपाख्यानं * यत्नात् सङ्कलितं मया॥
तव सम्माननार्थं हि तदुपक्रियते सभे।
शृणु तस्य कञ्चिदंशं पठामि तव सन्निधौ॥

हितोपदेशम्।

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचित् अवसन्नायां रात्रावस्ताचलचूड़ावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमटन्तं पाशहस्तं व्याधमपश्यत्। तमवलोक्याचिन्तयत् अहो अद्य प्रातरेवानिष्टदर्शनं जातं न जाने किमनभिमतं दर्शयिष्यति। इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः यतः—

शोकस्थानं सहस्राणि भयस्थानं शतानि च।
दिवसे दिवसे मूढ़मावि शन्ति न पण्डितम्॥

अन्यच्च विषयिणामिदमवश्यं कर्त्तव्यम्।

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्।
मरणव्याधिशोकानां किमद्य निपतिष्यति॥

अथ तेन व्याधेन तण्डुलकणान् विकीर्य्य जालं विस्तीर्णम्। तत्र स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह कुतोऽत्र निर्जने

* आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्।
अस्यामन्यकवीनाञ्च वृत्तं गद्यं क्वचित् क्वचित्॥
कथांशानां व्यवच्छेद आश्वास इति बध्यते।
आर्य्या वक्त्रापवक्त्राणां छन्दसा येन केनचित्।
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्॥

वने तण्डुलकणानां सम्भवः। तन्निरूपयतां तावत् भद्रमिदं न पश्यामि प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम्।

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
दृष्ट्वा व्याघ्रेण संप्राप्तः पथिकः स मृतो यथा॥

कपोता ऊचुः कथमेतत् सोऽब्रवीत् अहमेकदा दक्षिणारण्ये चरन्नपश्यम् एको दृष्टो व्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते भो भो पान्थाः इदं सुवर्णकङ्कणं गृह्यताम् ततो लोभाकृष्टेन केनचित्पान्थेनालोचितं भाग्येनैतत् सम्भवति किन्त्वस्मिन् आत्मसन्देहे प्रवृत्तिर्न विधेया। यतः

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।
यद्यन्ने विषसंसर्गोऽमृतं तदपि मृत्यवे॥

किन्तु सर्व्वथार्थार्जने प्रवृत्तौ सन्देह एव। तथा चोक्तम्।

न संशयमनारुह्य नरो भद्राणि पश्यति।
संशयं पुनरारुह्य यदि जीवति पश्यति॥

तन्निरूपयामि तावत्। प्रकाशं ब्रूते कुत्र तव कङ्कणम् व्याघ्रः हस्तं प्रसार्य्य दर्शयति। पान्थोऽवदत् कथं मारात्मके त्वयि विश्वासः।

व्याघ्र उवाच। शृणु रे पान्थ प्रागेव यौवनदशायामतिदुर्वृत्त आसम् अनेकगोमानुषाणां वधान्मे पुत्रा मृताः दाराश्च वंशहीनत्वाद्दं ततः केनचिद्धार्म्मिकेणाहमादिष्टः दानधर्म्मादिकञ्चरतु भवान् तदुपदेशादिदानीमहं स्नानशीलो दाता दृष्टो गलितनखदन्तो (दयावांश्च) न कथं विश्वासभूमिः। यतः

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्म्मश्चाष्टविधः स्मृतः॥
तत्र पूर्व्वश्चतुर्व्वर्गो दम्भार्थमपि सेव्यते।
उत्तरस्तु चतुर्व्वर्गो महात्मन्येव तिष्ठति॥

स मम चैतावान् लोभविरहः येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिदपि दातुमिच्छामि। तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः।

सभे त्वं हि नीतिविद्विद्वर्य्यात्मा नीतिपरायणा।
अतो नीतिमयग्रन्थमुपहारं गृहाण मे॥

श्रीहर्षदेव उवाच।

इदं रत्नावलीनाम दृश्यकाव्यं मया कृतम्।
बाला रत्नावली येन वत्सराजेन सङ्गता॥
सा वार्त्ता वर्णितात्रैव सभे तुभ्यं ददामि तत्।
कश्चिदं शोऽधुना तस्य कथ्यतेऽवहिता भव॥

रत्नावली।

राजा। वयस्य कः सन्देहः अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः। पश्य

दृष्ट्वा श्रीपुरुषोत्तमस्य समरे कण्ठे मणिं शत्रुभिः
नष्टं मन्त्रबलैर्वसन्ति वसुधामूले भुजङ्गाहताः।
पूर्वं लक्ष्मणवीरवानरभटा ये मेघनादाहताः
पीत्वा तेऽपि महौषधेर्गुणनिधेर्गत्वं पुनर्जीविताः॥

तदादेशय मार्गं येन वयमद्य तदवलोकलेन चक्षुषः फलमनुभवामः।

विदूषकः। (साटोपम्) एदु एदु भवं।

राजा। गच्छाग्रतः।

उभौ। (सगर्व्वं परिक्रामतः)

विदूषकः। (आकर्ण्य सभयं निहत्य राजानं हस्ते गृहीत्वा ससम्भ्रमम्)। भो वअस्स एहि पलाअह्म।

राजा। किमर्थम्।

विदूषकः। भो एदस्सिं वउलपादवे कोवि भूदो पडिवसदि।

राजा। धिङ्मूर्ख विश्रब्धं गम्यतां कुत दृष्टशानामत्र प्रभावः।

विदूषकः। फुड़क्खरं एव्व मन्तेदि जइ मम वअणं ण पत्तिआअसि ता अग्गदो भविअ सअं एव्व आअण्णेहि।

राजा। (तथा कृत्वा शृत्वा च।)

स्पष्टाक्षरमिदं तावन्मधुरं स्त्रीस्वभावतः।
अल्पाङ्गत्वादनिर्हादि मन्ये वदति सारिका॥

(ऊर्द्धं निरूप्य निपुणमवलोक्य)। कथं सारिका।

विदूषकः। (विचार्य) कधं सअं एव्व सारिआ।

राजा। (सस्मितम्) वयस्य एवम्।

विदूषकः। भो वअस्स तुमं मआलुआ जेण सारिआं भूदेत्ति मन्तेसि।

राजा। धिङ्मूर्ख यदात्मना कृतं तन्मयि सम्भावयसि।

विदूषकः। भो जइ एवं मा क्खु मं णिवारेहि। (सरोषम् दण्डकाष्ठमुद्यम्य) आः दासीए धीए तुमं जाणासि सअं एव्व वसन्तअ-भाअदि त्ति ता चिट्ठ दाव सुअन्तं जाव इमिणा पिसुणजणहिअअकुड़िलेण दण्डअट्ठेण परिपक्कं बिअ कइत्थफलं इमादो वउल-पादवादो अहणिअ भूमिए पाड़इस्सं। (इति हन्तुमुद्यतः।)

राजा। (निवार्यन्) मूर्ख किमर्थेषा रमणीयं व्याहरति तत् किमेनां त्रासयसि श्रृणुवस्तावत्। (उभावाकर्णयतः।)

विदूषकः। एवं भणादि इमस्स वच्छणस्स भोअणं दिज्जेत्ति।

राजा। सर्व्वमप्यौदरिकस्याभ्यवहार एव पर्य्यवस्यति तत् सत्यं वद किमालपति सारिका।

विदूषकः। (आकर्ण्य) भो वअस्स सुदं तुए जं एकाए मन्तिदं एसा भणादि सहि कीस तुए अहं एत्थ आलिहिदा सहि किं अआरणे कुप्पसि जादिसो तुए कामदेवो आलि-हिदो तादिसी मए रइ आलिहिदेत्ति भो वअस्स किं णेदं।

राजा। वयस्य एवं तर्कयामि कयापि हृदयवल्लभोऽनुरागादभिलिख्य कामव्यपदेशेन सखीपुरतोऽपहृतः तत्सख्यापि प्रत्यभिज्ञाय वैदग्ध्यादसावपि तत्रालिख्य रतिव्यपदेशेन दर्शितेति।

विदूषकः। (कोटिकां दत्त्वा) भो वअस्स जुज्जदि क्खु एदं।

राजा। भो वयस्य तूष्णींभव पुनरपि व्याहरति तच्छ्रुणवत्तावत्।

सर्व्वेषामेव मर्त्तव्यानां सभे रत्नावली प्रिया।
इति मत्त्वा मया दत्तां गृहाणोपहृतिन्तिमाम्॥

भट्टनारायण उवाच।

कुरूणां पाण्डवैः सार्द्धं लोमहर्षणविग्रहम्।
समाश्रित्य दृश्यकाव्यं वेणीसंहारसंज्ञकम्॥
कृतं मया सभे तुभ्यं उपहारं ददाम्यहम्।
आर्य्ये तस्य कियानंशः क्रियतां श्रुतिगोचरः॥

वेणीसंहारम्।

भीमः। आः पाप दुरात्मन् वृथामङ्गलपाठक शैलूषापसद।

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः॥

सहदेवः। (सानुनयम्) आर्य्य मर्षय मर्षय अनुमतमेव नो भरतपुत्रस्यास्य वचनम्। पश्य (निर्व्वाणवैरदहना इति पठित्वा अन्यथाभिनयति।)

भीमः। (सोपालम्भम्) न खलु अमङ्गलानि चिन्तयितुमर्हन्ति भवन्तः कौरवाणां सन्तोषास्ते भ्रातरो युष्माकम्।

सहदेवः। (सरोषम्) आर्य्य!

धृतराष्ट्रस्य तनयान् कृतवैरान् पदे पदे।
राजा न चेन्निषेद्धा स्यात् कः क्षमेत तवानुजः॥

भीमः। (सरोषम्) एवमिदं अतएवाद्यप्रभृति भिन्नोऽहं भवद्भ्यः। पश्य

प्रत्यङ्गं यद्वैरं मम खलु शिशोरेव कुरुभिः
न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम् ।
जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा सन्धिं भीमो विघटयति यूयं घटयत ॥

सहदेवः । (सानुनयम्) आर्य एवमतिसंभृतकोधेषु युष्मासु कदाचित् खिद्यते गुरुः ।

भीमः । (सहासम्) किं नाम मयि खिद्यते गुरुः (सामर्षम्) गुरुः खेदमपि जानाति । पश्य

तथाभूतां दृष्ट्वा नृपसदसि पञ्चालतनयां
वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिरतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥

तत् सहदेव निवर्त्तस्व एवञ्च अतिचिरप्रवृद्धामर्षोद्दीपितस्य भीमस्य वचनात् विज्ञापय राजानम् ।

सहदेवः । किमिति ।

भीमः । एवं विज्ञापय ।

युष्मच्छासनलङ्घनाभ्यसि मया मग्नेन नाम स्थितं
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि ।
क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतः कौरवान्
अद्यैकं दिवसं ममापि न गुरुर्नाहं विधेयस्तव ॥

इति साटोपम् परिक्रामति ।

सहदेवः । (तमेवानुगच्छन् आत्मगतम्) अये कथमार्यः पाञ्चाल्याश्चतुःशालं प्रविष्टः । भवतु तावत् अहमत्रैव तिष्ठामि । इति स्थितः ।

भीम । (परानिवृत्य अवलोक्य च) सहदेव गच्छ त्वं गुरुमनुवर्त्तस्व अहमप्यायुधागारं प्रविश्य आयुधसहायो भवामि ।

सहदेवः । आर्य्य नेदमायुधागारं पाञ्चाल्याश्चतुःशालमिदम् ।

भीमः। (सवितर्कम्) किन्नाम नेदमायुधागारं पाञ्चाल्याश्चतुःशालमिदं। (विचिन्त्य सहर्षम्) आमन्त्रयितव्या मया पाञ्चाली। (सप्रणयम सहदेवं हस्ते गृहीत्वा) वत्स आगम्यताम्।

सहदेवः। यदादिशत्यार्यः।

भीमः। वत्स यदार्यः कुरुभिः सन्मानमिच्छुन्नस्मान् पीड़यति तज्ज्ञवानपि पश्यतु। (परिक्रम्य उभौ गृहप्रवेशं नाटयतः।)

विदुरस्यानुकारेण मया दत्तमिमं सभे।
उपहारं गृहीत्वा मे सफलं कुरु जीवनम्॥

उपसंहारः।

ततस्ते कवयः सर्व्वे युगपत् हृष्टमानसाः।
आरेभिरे सभां स्तोतुं हलखण्डञ्च पुरोत्तमम् ॥ १ ॥
धन्या त्वं समिते यतः सुरगुरुप्रख्यैः सुधाभाषिभि-
र्मान्यैः श्रेष्ठकुलोद्गतैः सविनयैरग्रेसरैर्धीमताम्।
धैर्य्यौदार्य्यगुणाश्रयैरनलसैर्निर्मत्सरैः साधुभिः
कार्य्याकार्य्यविचक्षणैर्बुधवरैः सामाजिकैर्मण्डिता ॥ २ ॥
मर्त्तयानां मरधर्म्मिणां खलु कदाचारं सदा पश्यताम
चित्तं नोऽतिसुदुःसहं ननु सभे निर्व्वेदमाप स्वतः।
दृष्ट्वा त्वद्विधिदर्शिनां सुजनतां सर्व्वे वयं साम्प्रतं
आनन्दाब्धिपरिप्लुता निरुपमं प्राप्ताः सुखं शाश्वतम् ॥३॥
आरामान् विशिखास्त्रिकित्सितगृहान् विद्यालयान् दीर्घिकाः
रम्यै रत्नचयैर्वृतां धनवतां हर्म्म्यावलीमापणम्।
दृष्ट्वा तेऽतिनरं हलखण्ड विभवं मन्यामहे सर्व्वथा
किं ब्रूमोऽधिकमेकपिङ्गनगरे जाता घृणा नोऽधुना ॥ ४ ॥
नानादेशसमागतैः सुकृतिभिर्विद्योतिता गौरवैः
स्वाराजः समितिं सुरैः परिवृतां सङ्कोचयन्ती मुदा।
येनेयं महतो सभा स्वहृदयं नीता हलखण्ड त्वया
तस्मात्ते गुणवर्णनं सुकवयः कर्त्तुं कथं सक्षमाः ॥ ५ ॥
यस्याज्ञावशगः कुलालसदृशो ब्रह्मा ससर्जाखिलं
विष्णुः पाति निरन्तरं स्वजनकः पुत्रानिवेष्टप्रदः।
रुद्रः संहरति प्रतिक्षणमिव क्रुद्धोऽन्तको मूर्त्तिमान्
गोष्ठीस्थान् विदुषः स आदिपुरुषः पायादिति ब्रूमहे ॥६॥

समाप्तोऽयं ग्रन्थः।

Printed by I. C. Bose & Co., Stanhope Press, 249, Bow-Bazar Street, Calcutta.